# Shri Ganeshadvadashanama Stotram

# શ્રીગણેશદ્વાદશનામસ્તોત્રમ્

## Document Information

Text title : Shri Ganeshadvadashanama Stotram

File name : gaNeshadvAdashanAmastotram2.itx

Category : ganesha, gaNeshapurANa, dvAdasha

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH | adhyAya 92 | 1.92 36-47||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# શ્રીગણેશદ્વાદશનામસ્તોત્રમ્

બ્રહ્મોવાચ ।
સુમુખશ્ચૈકદન્તશ્ચ કપિલો ગજકર્ણકઃ ।
લમ્બોદરશ્ચ વિકટો વિઘ્નનાશો ગણાધિપઃ ॥ ૩૬॥

ધૂમ્રકેતુર્ગણાધ્યક્ષો ભાલચન્દ્રો ગજાનનઃ ।
દ્વાદશૈતાનિ નામાનિ યઃ પઠેચ્છૃણુયાદપિ ॥ ૩૭॥

વિદ્યારમ્ભે વિવાહે ચ પ્રવેશે નિર્ગમે તથા ।
સઙ્ગ્રામે સઙ્કટે ચૈવ વિઘ્નસ્તસ્ય ન જાયતે ॥ ૩૮॥

શુક્લામ્બરધરં દેવં શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥ ૩૯॥

કોટિકન્યાપ્રદાનાનિ કોટિયજ્ઞાં વ્રતાનિ ચ ।
તપાંસિ યાનિ સર્વાણિ તીર્થાન્યાયતનાનિ ચ ॥ ૪૦॥

સ્વર્ણભારસહસ્રાણિ કોટિદાનાનિ યાન્યપિ ।
કૃચ્છ્રાણિ તપ્તકૃચ્છ્રાણિ પરાકેન્દુવ્રતાનિ ચ ॥ ૪૧॥

શતાંશમેષાં પુણ્યસ્ય તાનિ નામ્નાં ન યાન્તિ ચ ।
ઇમાનિ પ્રાતરુત્થાય શુચિર્ભૂત્વા સમાહિતઃ ॥ ૪૨॥

યઃ પઠેન્માનવો ભક્ત્યા વિઘ્ના નો યાન્તિ તં નરમ્ ।
સિદ્ધ્યન્તિ સર્વકાર્યાણિ મોક્ષમન્તે વ્રજત્યસૌ ॥ ૪૩॥

તસ્ય દર્શનતો લોકા દેવાઃ પૂતા ભવન્તિ ચ ।
અત એવ મુને ! સર્વાઃ શાક્તાઃ શૈવાશ્ચ વૈષ્ણવાઃ ॥ ૪૪॥ (સૌરાઃ)

ઉક્ત્વા દ્વાદશ નામાનિ સર્વકાર્યાણિ કુર્વતે ।
ગાણેશા અપિ કુર્વન્તિ કિમત્રાપિ ચ કૌતુકમ્ ॥ ૪૫॥

ન સિદ્ધ્યન્તિ હિ કાર્યાણિ દ્વાદશાન્યતમસ્ય હ ।

ઉચ્ચારણં વિના બ્રહ્માઁસ્તસ્માદેકં સમુચ્ચરેત્ ॥ ૪૬॥

દુષ્ટાનાં નાસ્તિકાનાં ચકાર્યં યદ્ યદ્ધિ સિદ્ધ્યતિ ।
તેઽપિ બીજં સમુચ્ચાર્યમજ્ઞાનાદપિ કુર્વતે ॥ ૪૭॥

ઇતિ શ્રીગણેશ દ્વાદશનામાનિ સ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીગણેશપુરાણં ઉપાસના (પૂર્વ)ખણ્ડ । અધ્યાય ૯૨ । ૧.૯૨ ૩૬-૪૭॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDa . adhyAya 92 . 1.92 36-47..

Some of the verses are same as in mudgalapurANa.

Proofread by Preeti Bhandare

---

*Shri Ganeshadvadashanama Stotram*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*